**तुङ्गभद्र** पु० तुङ्गोऽपि भद्रः। १मदोत्कटकरिणि दक्षिणस्थे २नदीभेदे स्त्री मेदि०। "शर्करावर्त्ता तुङ्गभद्राकृष्णवेणे-त्यादि" भाग० ५।१९।१८ श्लो० भारतस्थनदीकथने। "तुङ्गभद्राजलं स्वादु स्निग्धं प्रोक्तं तथा गुरु!। कण्डूपित्तास्रदं प्रायः सात्म्यं मेधाकरं मतम्" राजनि० तज्जलगुणा उक्ताः।

**तुङ्गवीज** न० तुङ्गस्य शिवस्य वीजम्। १पारदे। "तुङ्गवीज-समायुक्तं गोलयन्त्रं प्रसाधयेत्" सू०सि० "तुङ्गो महादेव-स्तस्य वीजं वीर्य्यं पारद इत्यर्थः" रङ्गना०।

**तुङ्गवेणा** स्त्री नदीभेदे "तुङ्गवेणा कृष्णवेणा कपिला शोण एव च" भा०व० २२१ अ०। "विनदीं पिङ्गलां वेणां तुङ्गवेणां महानदीम्" भा० भी० ९अ०।

**तुङ्गरस** पु० तुङ्गः श्रेष्ठो रसोऽस्य। गन्धद्रव्यभेदे "काला-गुरुविमिश्रेण तथा तुङ्गरसेन च" भा० आ० १२७ अ०।

**तुङ्गशेखर** पु०तुङ्ग उच्चशेखरमस्य। १पर्वते शब्दमा०। २उच्चशेख-रयुक्ते त्रि०। कर्म्म०। ३उच्चे शेखरे न०।

**तुङ्गा** स्त्री तुङ्ग+टाप्। १वंशलोचनायां २शम्याञ्च राजनि०।

**तुङ्गिन्** त्रि० तुङ्गं मेषादिकं स्थानमाश्रयत्वेनास्त्यस्य इनि। उच्चस्थिते ग्रहे ३महाशतावर्य्यां स्त्री ङीप् राजनि०। ४प्रधानस्थानस्थे त्रि०। [२रात्रौ शब्दार्थचि०।

**तुङ्गी** स्त्री तुङ्ग+गौरा०ङीष्। १हरिद्रायां २वर्वरायां मेदि०।

**तुङ्गीनास** पु०तुङ्गी हरिद्रेव पीता नासाऽस्य। १कीटभेदे। "तुङ्गीनासो विचिलकस्तालको वाहकस्तथा। कोष्ठा-गारी क्रिमिकरो यश्च मण्डलपुच्छकः। तुङ्गनाभः सर्ष-पिकोऽवल्गुली शम्बुकस्तथा। अग्निकीटश्च घोराः स्यु-र्द्वादश प्राणनाशनाः" सुश्रु०।

**तुङ्गीपति** पु०तुङ्ग्याः रात्रेः पतिः। निशापतौ चन्द्रे त्रिका०

**तुङ्गीश** पु० कर्म्म०। १शिवे २कृष्णे ३सूर्य्ये च शब्दर० तेषां प्रधानस्थानस्थित्या तथात्वम्। ६त०। रात्रीशे ४चन्द्रे।

**तुच्** पु० त्वच–क्विप् बा० संप्रसा०तुज–क्विप् वा पृषो० जस्य चः। १अपत्ये निघण्टुः। "तुचे तनाय तत्सु" ऋ० ८।१८।१८। "तुचे पुत्राय" भा०। "तुचे तु नो भवन्तु" ८।२७।१४। "तोजयति पितुर्दुःखादिकमिति तुच् पुत्रः तस्मै" भा०। पृषो० जस्य चः इति भेदः। हेमचन्द्रे तु जान्ततयाऽयं पठितः वेदे तु सर्वत्र चान्तत्वेनैव प्रयोगः।

**तुच्छ** न० तुद–बाहु० क्विप् तुदा व्यथया छ्यति छो–क। १पुलाके (तुष) २हीने, उणा०। ३शून्ये अमरः ४अल्पे हेमच०। ५शून्ये च त्रि०। "किमेतै रात्मनस्तुच्छैः सह देहेन नश्वरैः। अनर्थैरर्थसङ्काशैर्नित्यानन्दरसोदधेः" भाग० ७।७। ३८।८५ नीलीवृक्षे ६तुत्थाञ्जने च भावप्र०। ७मन्दे अलीके च त्रि०

**तुच्छद्रु** पु० कर्म्म०। एरण्डवृक्षे शब्दच०।

**तुच्छधान्यक** न० कर्म्म०। (भुसी) पुलाके अमरः।

**तुच्छ्य** न०तुच्छ–वेदे स्वार्थे इवार्थे वा यत्। १तुच्छशब्दार्थे २तुच्छ-कल्पे च "तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्। तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिना जायतैकम्"। ऋ०१०।१२९।३ अयमर्थः। ननूक्तप्रकारेण यदि पूर्वमिदं जगन्नासीत् कथं तर्हि तस्य जन्म? जायमानस्य जनिक्रियायां कर्तृत्वेन कारकत्वात् का-रकं च कारणावान्तरविशेष इति कारकस्य सतो नियतपूर्वक्षणवर्तित्वस्यावश्यम्भावात्। अथैतद्दोषपरि जिहीर्षया जनिक्रियायाः प्रागपि तद्विद्यत इत्युच्यते कथं तस्य जन्म? अत आह। तमसा गूढमग्रे सृष्टेः, प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत्तमसा-गूढम्। यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत् आत्मतत्त्वस्यावरकत्वान् मायापरसं ज्ञं भावरूपा-ज्ञानमत्र तम इत्युच्यते। तेन तमसा निगूढं संवृतं कारणभूतेन तेनाच्छादितं भवति। छादकात्तस्मात्तमसो नामरूपाभ्यां यदाऽविर्भवनं तदेव तस्य जन्मेत्युच्यते। एतेन कारणावस्थायामसदेव कार्य्यमुत्पद्यत इत्यसद्वादि-नोऽसत्कार्य्यवादिनो ये मन्यन्ते ते प्रत्याख्याताः। ननु-कारणे तमसि तज्जगदात्मकं कार्य्यं विद्यते चेत् कथं नासीद्रज इत्यादि निषेधः। तत्राह तम आसीदिति। तमोभावरूपाज्ञानं मूलकारणं तद्रूपता तदात्मनाम्। यतः सर्वं जगत् प्राक् तम आसीदतो निषिध्यत इत्यर्थः। नन्वावरकत्वादावरकं तमः कर्तृ आवार्य्यत्वा-ज्जगत् कर्म्म। कथं तयोः कर्म्मकर्त्रोस्तादात्म्यम्। तत्राह अप्रकेतमिति। अप्रकेतमप्रज्ञायमानम्। अय-मर्थः। यद्यपि जगतस्तमसश्च कर्म्मकर्तृभावो यौक्तिको न विद्यते तथापि व्यवहारदशायामिव तस्यां दशायां नामरूपाभ्यां विस्पष्टं न ज्ञायत इति तादात्म्यवर्णनम्। अतएव मनुना स्मर्यते "आसीदिदं तमोभूतमप्रज्ञातम-लक्षणम्। अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः" इति। कुतो वा न प्रज्ञायते तत्राह सलिलम्। सल–गतौ। औणादिक इलच्। इदं दृश्यमानं सर्वं जगत् सलिलं कारणेन संगतमविभागापन्नम् आसीत्। अस्तेर्लङि तिपि बहुलं छन्दसीतीडभावे हल्ङ्याब्भ्य इति